अध्यायः 1




## समानता

भारतं लोकतान्त्रिकदेशः अस्ति। षष्ठकक्षायाः पुस्तके वयं लोकतान्त्रिकसर्वकारस्य मुख्य-तत्त्वानां विषये पठितवन्तः यथा जनानां सहभागिता, सङ्घर्षाणां शान्तिपूर्णं समाधानं, समानताः न्यायः च। समानता लोकतन्त्रस्य मुख्यविशेषता अस्ति तथा च एतस्याः कार्यप्रणाली सर्वान् पक्षान् प्रभावयति। एतस्मिन् अध्याये भवन्तः समानतायाः विषये इतोऽपि आधिक्येन ज्ञास्यन्ति इयं का अस्ति ? लोकतन्त्रस्य कृते इयं किमर्थम् आवश्यकी अस्ति तथा च भारते सर्वे समानाः सन्ति उत न। वयं कान्तायाः कथया चर्चायाः आरम्भं कुर्मः।




अब्दुलरहमानः
शिल्पकारः
शबनमबानो
गृहिणी
ग्रेसी-लैलेंगः
परामर्शदात्री
आइजैक-लैलेंगः
सर्वकारीयाधिकारी
रुख्सानामिर्जा
मीडिया-कर्मिणी
योगराजः
वृत्तिहीनः
अशोकजैनः
उद्योगपतिः
किञ्चिद् कालानन्तरम.....
कान्ता पश्चात् आगच्छतु
ओम्.....
नमस्ते महोदय
गुड़िया ज्वरेण पीडिता अस्ति सा चिकित्सालये नेतव्या अस्ति.....
किन्तु प्रथमं महोदयस्य गृहस्य कार्यं कुर्याम् .....
तस्मात् किञ्चित् धनं च स्वीकुर्याम्
गृहे
स्वीकरोतु, इदं पिबतु--- भवती अनुकूलम् अनुभविष्यति ।
,तथा च यदा अहं सायङ्काले गृहं प्रत्यागमिष्यामि
तदा आवां चिकित्सालय चलिष्यावः - सम्यक् ?
गुड़िया ज्वरपीडिता अस्ति सा च चिकित्सालयं प्रति नेतव्या अस्ति ....परन्च पूर्वं स्वामिनः
गृहस्य कार्यं कृत्वा आगच्छामि....तथा च तस्मात् कानिचन रूप्यकानि
.... ऋणरूपेण स्वीकृत्य आगच्छामि







# मताधिकारस्य समानता

*यदा कान्ता मतदानस्य कृते पङ्क्तौ स्थिता आसीत् ततः कथायाः प्रारम्भः जायते। पुनः तान् विभिन्नान् जनान् प्रति पश्यन्तु ये तया सह पङ्क्तौ स्थिताः सन्ति । कान्ता स्वकीयं स्वामिनं जैनमहोदयं परिचिनोति तथा च स्वप्रतिवेशिनं छोटेलालम् अपि । भारतसदृशे लोकतान्त्रिके देशे सर्वेषां वयस्कानां कृते मतदानस्य अधिकारः अस्ति तेषां कोऽपि धर्मः स्यात् तथा च शिक्षायाः जातेः च स्तरः कीदृशः अपि वा स्यात्, ते धनिकाः स्युः अथवा निर्धनाः। एतद् एव यथा भवन्तः गतवर्षस्य पाठ्यपुस्तके पठितवन्तः सन्ति सार्वभौमिक-वयस्क-मताधिकारः उच्यते तथा च एषः अपि लोकतन्त्रप्रणाल्याः आवश्यकपक्षः अस्ति। सार्वभौमिक-वयस्क-मताधिकारस्य विचारः समानतायाः विचारे आधारितः अस्ति यतोहि एषः विचारः उद्घोषयति यत् देशस्य प्रत्येकं वयस्कस्त्रीपुरुषौ, तस्य तस्याः वा आर्थिकस्तरः अथवा जातिः कीदृशी अपि स्यात् सः मतदानस्य अधिकारी अस्ति। कान्ता मतदानं कर्तुं बहुव्यग्रा अस्ति तथा च इदं दृष्ट्वा बहुप्रसन्ना अस्ति यत् सा अन्यैः सर्वैः तुल्या वर्तते यतोहि तेषां सर्वेषां पार्श्वे अपि समानरूपेण एव मतदानस्य अधिकारः अस्ति।*

*परन्तु यथा यथा दिनं व्यतीतं भवति कान्तायाः मनसि समानतायाः वास्तविकार्थस्य विषये शङ्का जायते।*

*इदं किं तथ्यम् अस्ति यतः कान्तायाः मनसि शङ्का अजायत ? आगच्छन्तु, तस्याः जीवनस्य दिनचर्यां पश्यामः सा एकस्मिन् कुटीरे निवसति तथा च तस्याः गृहस्य पृष्ठे एका कुल्या अस्ति। तस्याः पुत्री रुग्णा अस्ति परन्तु सा स्वकार्यतः एकस्य दिनस्य अपि अवकाशं स्वीकर्तुं न शक्नोति यतोहि सा स्वस्वामितः बालिकायाः चिकित्सायाः कृते धनं ऋणरूपेण स्वीकर्तुम् इच्छति । परगृहेषु भृत्यताकरणेन सा श्रान्ता भवति। तथा च अन्ततः सा दिनस्य समाप्तौ अपि दीर्घतमायां पङ्क्तौ स्थिता अस्ति। सर्वकारीय-चिकित्सालयस्य पुरः स्थिता इयं पङ्क्तिः तस्याः पङ्क्तेः भिन्ना अस्ति यस्यां सा प्रातःकाले स्थिता आसीत्, यतोहि एतस्यां पङ्क्तौ स्थिताः अधिकतराः जनाः निर्धनाः आसन्।*

---

*भवतां विचारेण समानतायाः विषये शङ्कां कर्तुं कान्तायाः पार्श्वे कानि पर्याप्तानि कारणानि सन्ति ? उपर्युक्तकथायाः आधारेण तस्याः एतादृशस्य चिन्तनस्य त्रीणि कारणानि ज्ञापयन्तु।*

**तस्मिन् सायङ्काले**






## *अन्यप्रकारका: असमानता:*

कान्ता तेषु बहुषु जनेषु काचित् वर्तते ये भारतीयलोकतन्त्रे निवसन्ति तथा च ये मताधिकारं प्राप्तवन्तः परन्तु येषां दैनन्दिनजीवनं कार्यकरणस्य च परिस्थितयः समानतातः बहुदूरे सन्ति। निर्धनताम् अतिरिच्य भारते जनाः बहुभिः इतरैः कारणैः असमानतायाः सम्मुखीकरणं कर्तुं बाध्याः सन्ति। एतस्य अभिप्रायं वयं निम्नलिखिते द्वे कथे पठित्वा ज्ञास्यामः। एते द्वे अपि वास्तविक-घटनासु आधारिते स्तः तथा च भारते विद्यमानासु विभिन्नासु असमानतासु प्रकाशं निपातयतः।

भारते सामान्यतः प्रचलितासु असमानतासु एका अस्ति जातिगत-व्यवस्था। यदि भवन्तः ग्रामीणभारते निवसन्ति तर्हि जातिगत-परिचयस्य अनुभवः प्रायः अल्पायुषि एव जायते। यदि भवन्तः भारतस्य नागरक्षेत्रे निवसन्ति तर्हि प्रायः भवताम् इदं चिन्तनं स्यात् यत् अधुना जनाः जात्याधारित-व्यवस्थायां न विश्वसन्ति। परन्तु किञ्चित् कस्यचित् प्रमुखस्य समाचारपत्रस्य वैवाहिक-विज्ञापनस्य भागं पश्यन्तु तदा भवन्तः ज्ञास्यन्ति यत् उच्चशिक्षाप्राप्त-भारतीयस्य मस्तिष्के अपि जातिः कियती महत्त्वपूर्णा अस्ति।

आगच्छन्तु अधुना काञ्चित् कथां जानीमः या विद्यालयगन्तुः कस्यचित् दलितबालकस्य अनुभवानां विषये वर्तते। दलितानां विषये भवन्तः पूर्वम् एव गतवर्षस्य पुस्तके पठितवन्तः। दलितः कश्चित् एतादृशः शब्दः अस्ति यं शब्दं निम्नजातिवर्गस्य जनाः आत्मानं सम्बोधयितुं प्रयोगं कुर्वन्ति। दलितस्य अर्थः भवति - भिन्नः अथवा छिन्नः तथा च एतस्य शब्दस्य प्रयोगं कृत्वा दलिताः एतं सङ्केतं कुर्वन्ति यत् पूर्वम् अपि तैः सह महाभेदभावस्य व्यवहारः भवति स्म तथा च अद्यापि भवति।

ओमप्रकाशवाल्मीकिः कश्चित् सुप्रसिद्धः दलितलेखकः अस्ति। स्वात्मकथायां ***जूठन*** इत्यस्यां सः लिखति यत् विद्यालये अन्येभ्यः दूरे उपवेष्टुं वयं बाध्याः आस्म तदपि भूमौ। अस्माकम् आसनस्य यत् स्थानम् आसीत् तत्र पर्यन्तं कटः न प्राप्नोति स्म। कदाचित् तु अस्माभिः पूर्णतया द्वारस्य पार्श्वे उपवेष्टव्यं भवति स्म यतः कृष्णफलके लिखितानि अक्षराणि अपि स्पष्टतया न दृश्यन्ते स्म। कदाचित् अकारणम् एव ताडनं भवति स्म। यदा सः चतुर्थकक्ष्यायाम् आसीत् प्रधानाचार्यः ओमप्रकाशं विद्यालये क्रीडाक्षेत्रे च सम्मार्जनं कर्तुम् उक्तवान्। सः लिखति "आयामयुक्तं क्रीडाक्षेत्रं तस्य क्षमतायाः अपेक्षया बहुदीर्घम् आसीत् यस्य स्वच्छतायाः समये मम कट्यां वेदना जायमाना आसीत्।

कुर्मीक्षत्रियः 26/5-4 बी.एस.सी (माइक्रोबायो) एम.एस.सी (बायोटेक) बी.एस.सी (बायोटेक) बी.एड., असिस्टेंट प्रोफेसरप्राइवेट-कालेजहेतुः सजातीयः वरः अपेक्षितः अस्ति।

ब्राह्मण-जीजोदिया बुंदेलखण्डीब्राह्मणः ध्रुवकौशल-गोत्रम्, 30/5.00 गौरवर्णः, एम.ए, त्रिषु विषयेषु तथा च अन्य डिप्लोमाकोर्स-कन्यार्थं वरः अपेक्षितः सर्वे ब्राह्मणाः मान्याः सन्ति।

तोमरराजपूतः 30/5-9" मैकेनिकल-इंजीनियर-सुजलानः (पुणे) इत्यस्य कृते सेवारतः उच्चतकनीकी अर्हताप्राप्त-राजपतकन्या आवश्यकी।

23/5'3 कृशकाया गौरवर्णा, बी.ई सङ्गणकविज्ञानम्, छत्तीसगढ-निवासिनी अग्रवालकन्यायाः कृते स्वजातीयः तत्तुल्यः वरः वाञ्छनीयः।

***उपरि प्रदत्तवैवाहिकविज्ञापनेषु जातेः सूचकेषु भागेषु गोलाकारचिह्नं करोतु।***




***ओमप्रकाशवाल्मीकेः पुस्तकस्य जूठन इत्यस्य मुखपृष्ठं यस्मिन् सः कस्यचित् दलितबालकस्य रूपेण वयस्कस्य अनुभवान् प्रस्तौति ।***

*भवतां विचारेण ओमप्रकाशवाल्मीकिना सह तस्य सहपाठिनः शिक्षकाः च असमानतायाः व्यवहारं किमर्थं कृतवन्तः? आत्मानम् ओमप्रकाशवाल्मीकेः स्थाने स्थापयन् पङ्क्तिचतुष्टयं लिखन्तु यत् उक्तपरिस्थितौ भवान् कीदृशम् अनुभवम् अकरिष्यत् ?*

*भवतां विचारेण अंसारीदम्पतीभ्यां सह असमानतायाः व्यवहारः किमर्थं क्रियते स्म? यदि भवन्तः अंसारीदम्पत्योः स्थाने अभविष्यन् तथा च भवतां निवासार्थं एतस्मात् कारणात् स्थानस्य प्राप्तिः न अभविष्यत् यतोहि केचन प्रतिवेशिनः भवतां धर्मस्य कारणतः भवद्भिः सह न स्थातुम् इच्छन्ति तदा भवन्तः किम् अकरिष्यन्?*

धूलिकणैः मुखं शिरः च युक्तं जातम् आसीत् । मुखस्य अन्तः धूलिकणाः प्रविष्टाः आसन् । मम कक्षायाम् अन्ये बालकाः पठन्ति स्म तथा च अहं सम्मार्जनं करोमि स्म । मुख्याध्यापकः स्वस्य प्रकोष्ठे उपविष्टः आसीत् परन्तु दृष्टिः मयि आसीत् । जलपानस्य अपि आज्ञा न आसीत् । आदिनम् अहं सम्मार्जने लग्नः आस्म । विद्यालयस्य प्रकोष्ठेभ्यः द्वारेभ्यः शिक्षकाः बालकाः च निलीय मां पश्यन्ति स्म । ओमप्रकाशेन अग्रिमे द्वे दिने यावत् विद्यालये क्रीडाक्षेत्रे च नैरन्तर्येण सम्मार्जनं कारितं तथा च एषः क्रमः तदा स्थगितः यदा ततः गच्छन् तस्य पिता स्वपुत्रं सम्मार्जनं कुर्वन्तं दृष्टवान् । सः शिक्षकाणां साहसपूर्वकं सम्मुखीकरणं कृतवान् तथा च ओमप्रकाशस्य हस्तं गृहीत्वा विद्यालयतः बहिर्गच्छन् उच्चस्वरेण सर्वान् श्रावयन् उक्तवान् - शिक्षकः असि... अतः गच्छामि...... परन्तु किञ्चित् स्मर शिक्षक ! एषः अत्र एव पठिष्यति अस्मिन् एव विद्यालये ! एतावदेव न एतदनन्तरम् अन्ये दलिताः अपि आगमिष्यन्ति पठनार्थम् ।

अपरा कथा एकस्याम् एतादृश्यां घटनायाम् आधारिता अस्ति या भारतस्य एकस्मिन् बृहति नगरे घटिता तथा च देशस्य अधिकेषु भागेषु एतादृशं प्रचलनं सामान्यः विषयः अस्ति । एषा कथा अंसारीदम्पत्योः वर्तते यौ नगरे भाटकेन प्रकोष्ठं स्वीकर्तुम् इच्छतः स्म । तौ धनाढ्यौ आस्ताम् अतः सम्पत्तिविक्रेतुः समीपं गतवन्तौ । विक्रेता तौ उक्तवान् यत् सः बहूनां रिक्तभवनानां विषये जानाति यानि भाटकेन प्राप्तुं शक्यन्ते । तौ प्रथमं गृहं द्रष्टुं गतवन्तौ । अंसारीदम्पतीभ्यां गृहम् अरोचत तौ गृहं स्वीकर्तुं निर्णयं कृतवन्तौ । पुनः यदा गृहस्वामिन्या तयोः नामानि श्रुतानि तदा सा व्याजं कर्तुम् आरब्धवती यत् सा मांसहारिभ्यः जनेभ्यः गृहं न दातुं शक्नोति यतोहि तस्मिन् भवने कोऽपि मांसाहारी जनः निवासं न करोति । सम्पत्तिविक्रेता अंसारीदम्पती च एतत् सर्वं श्रुत्वा आश्चर्यचकिताः जाताः यतोहि पार्श्वतः मत्स्यपाकस्य गन्धः आगच्छति स्म । तेषां पुरतः अपरेषां भवनानां स्वामिनः अपि एतत् एव व्याजं प्रदर्शितवन्तः । अन्ते सम्पत्तिविक्रेता परामर्शं दत्तवान् यत् किं ते स्वनाम्नोः परिवर्तनं कर्तुं शक्नुतः? स्वनामनी परिवर्तनं कृत्वा श्रीकुमारं श्रीमतीकुमारीं च कुरुताम् । अंसारीदम्पती तथा कर्तुम् इच्छुकौ न आस्ताम्, अतः तौ कानिचन अन्यानि भवनानि द्रष्टुं निर्णयं कृतवन्तौ । अन्ते प्रायः मासं यावत् अन्वेषणान्तरं तौ काञ्चित् गृहस्वामिनीं प्राप्तवन्तौ या तेषां कृते भाटकगृहं दातुं स्वीकृतवती

## *मानवीयगरिम्णः मूल्यम्*

अधुना यावत् भवन्तः ज्ञातवन्तः स्युः यत् प्रायः कैश्चित् जनैः सह असमानतायाः व्यवहारः केवलम् एतदर्थं भवति यत् तेषां जन्म कस्यां जातौ लिङ्गे अथवा कस्मिन् धर्मे जातम् अस्ति तथा च ते उच्चवर्गस्य सन्ति अथवा न सन्ति अथवा मध्यमनिम्नवर्गयोः वा सन्ति । ओमप्रकाश-वाल्मीकिना अंसारीपरिवारेण च सह असमानतायाः व्यवहारः जातिगतैः धर्मगतैः च कारणैः अभवत्।

यदा जनैः सह असमानतायाः व्यवहारः भवति तदा तेषां सम्मानस्य हानिः भवति । ओमप्रकाशवाल्मीकिना अंसारीदम्पतीभ्यां च सह कृतव्यवहारस्य कारणतः तेषां गरिम्णः हानिः अभवत् । ओमप्रकाशवाल्मीकि-महोदयस्य जातेः कारणतः, तेन विद्यालये सम्मार्जनं कारयित्वा शिक्षकैः छात्रैः च तस्य सम्मानस्य महती हानिः कृता तथा तादृशी अनुभूतिः कारिता यत् सः विद्यालयीयैः अन्यैः छात्रैः तुल्यः नास्ति सः तेभ्यः न्यूनतमः आस्ति । बालकत्वात् ओमप्रकाशवाल्मीकिः स्वयम् एतस्मिन् विषये अधिकं किमपि न कृतवान्। किन्तु यदा तस्य पिता स्वपुत्रं सम्मार्जनं कुर्वन्तं दृष्टवान् तदा सः एतस्मै असमानव्यवहाराय क्रोधं कृतवान् तथा च सः शिक्षकाणां समक्षे विरोधं प्रकटितवान्। यदा जनाः अंसारीदम्पत्योः कृते स्वभवनं भाटकेन दातुं न स्वीकृतवन्तः तदा तेषां सम्मानस्य क्षतिः जाता। पुनः यदा सम्पत्तिविक्रेता तेषां कृते नामपरिवर्तनस्य परामर्शं दत्तवान् तदा तेषाम् आत्मसम्मानस्य रक्षार्थं तथा न कृतवन्तः ते तस्य तं परामर्शं न स्वीकृतवन्तः।

ओमप्रकाशेन अंसारीदम्पतीभ्यां च सह एतादृशेन व्यवहारेण न भवितव्यम् आसीत् । ते तस्य एव सम्मानस्य गरिम्णः च अधिकारिणः आसन् यः अन्यस्य कस्यचित् जनस्य कृते लभते।

*यदि भवान् अंसारीपरिवारस्य कश्चित् सदस्यः अभविष्यत् तर्हि सम्पत्तिविक्रेत्रा नामपरिवर्तनस्य परामर्शस्य उत्तरं कथम् अदास्यत् ?*

*किं भवान् स्वजीवनस्य काञ्चित् एतादृशीं घटनां स्मरति यदा भवतः गरिम्णः हानिः जाता स्यात् ? भवान् तस्मिन् काले किम् अनुभूतवान् आसीत् ?*



*१९७५ तमे वर्षे निर्मिते दीवार इति चलचित्रे पादत्राणे वर्णलेपकः कश्चित् बालकः क्षेपित्वा प्रदत्तधनं न स्वीकरोति। सः चिन्तयति यत् तस्य कार्यस्य अपि गरिमा वर्तते तथा च तस्य पारिश्रमिकः तस्मै आदरेण प्रदेयः।*

## भारतीयलोकतन्त्रे समानता

भारतीयसंविधानं सर्वान् जनान् समानरूपेण पश्यति । एतस्य अर्थः अस्ति यत् देशस्य प्रत्येकं जनः, सः कश्चित् पुरुषः स्यात् अथवा काचित् महिला तेषां धर्मः जातिः शैक्षिकपृष्ठभूमिः आर्थिकपृष्ठभूमिः च किमपि स्यात् तैः सह समानरूपेण व्यवहारः करिष्यते अथवा ते समानदृष्ट्या द्रक्ष्यन्ते । परन्तु तदनन्तरम् अपि वयम् एतद् न वक्तुं शक्नुमः यत् असमानतायाः व्यवहारः समाप्तः जातः। एषः न समाप्तः परन्तु पुनरपि भारतीयसंविधाने



*संसद् अस्माकं लोकतन्त्रस्य आधारस्तम्भः अस्ति तथा च वयं स्वस्य निर्वाचितप्रतिनिधीनां माध्यमेन तत्र प्रतिनिधित्वं प्राप्नुमः।*

सर्वेषां जनानां समानतायाः सिद्धान्तः मान्यः कृतः अस्ति । यत्र पूर्वं भेदभावतः दुर्व्यवहारतः च जनानां रक्षार्थं कश्चित् अपि अधिनियमः न आसीत् अधुना अनेके अधिनियमाः जनानां सम्मानस्य तैः सह च समानतायाः व्यवहारं सुनिश्चेतुं विद्यमानाः सन्ति ।

समानतां स्थापयितुं संविधाने यानि प्रावधानानि सन्ति तेषु कानिचन् निम्नलिखितानि सन्ति – प्रथमम्, अधिनियमस्य दृष्ट्या प्रत्येकं जनः समानः अस्ति । एतस्य तात्पर्यम् एतद् अस्ति यत् प्रत्येकं जनस्य कृते राष्ट्रपतेः आरभ्यः कान्ता-सदृश-गृहसेविका-पर्यन्तं सर्वैः समानरूपेण अभिनियमानां पालनं करणीयं भवति । द्वितीयम्, केनापि जनेन सह तस्य धर्मस्य जातेः वंशस्य जन्मस्थानस्य च आधारेण तथा च तस्य स्त्रीपुरुषयोः आधारेण च भेदभावः न कर्तुं शक्यते । तृतीयम्, प्रत्येकं जनः सार्वजनिकेषु स्थानेषु गन्तुं शक्नोति येषु क्रीडाक्षेत्रम् उपाहार-मन्दिराणि आपणानि विपण्यादयः सम्मिलिताः सन्ति । सर्वे जनाः सार्वजनिक-कूपानां राजमार्गाणां स्नान-घट्टानां च उपयोगं कर्तुं शक्नुवन्ति । चतुर्थम्, अस्पृश्यतायाः उन्मूलनं कृतम् अस्ति ।

प्रशासनेन संविधानेन प्रदत्तस्य मान्यदत्तस्य च समानतायाः अधिकारः द्विविधा क्रियान्वयनं प्रति नीतः अस्ति - प्रथमः अधिनियमेन अपरञ्च सर्वकारस्य योजनाभिः कार्यक्रमैः च सुविधाहीनसमाजानां साहाय्यं कृत्वा । भारते एतादृशाः अनेके अधिनियमाः सन्ति ये जनस्य समानव्यवहारप्राप्तेः अधिकारस्य रक्षां कुर्वन्ति । अधिनियमेन सह सर्वकारः अपि, यैः समुदायैः सह शताधिकेभ्यः वर्षेभ्यः असमानतायाः व्यवहारः अभवत् तेषां जीवनम् उन्नतं कर्तुम् अनेकेषां कार्यक्रमाणां योजनानां च क्रियान्वयनं कृतम् । एताः योजनाः एतदर्थं चालिताः सन्ति यत् यैः जनैः अतीते काले अवसराः न प्राप्ताः अधुना ते अधिकान् अवसरान् प्राप्नुयुः।

एतस्यां दिशि सर्वकारेण कृतः प्रयासः अस्ति – मध्याह्नभोजनस्य व्यवस्था भवेत् इति । एतस्य कार्यक्रमस्य अन्तर्गतं सर्वेषां सर्वकारीय-प्राथमिक-विद्यालयस्य बालकानां कृते मध्याह्नभोजनं विद्यालये दीयते । एषा योजना भारते सर्वप्रथमं तमिलनाडुराज्ये प्रारब्धा तथा च 2001 तमे वर्षे उच्चतम-न्यायालयेन सर्वे राज्य-सर्वकाराः षण्-मासाभ्यन्तरे सर्वेषु विद्यालयेषु प्रारब्धुं निर्दिष्टाः । एतस्य कार्यक्रमस्य अतीव सकारात्मक-प्रभावः जातः । उदाहरणार्थं मध्याह्न-भोजनस्य प्राप्तेः कारणतः निर्धनाः बालकाः अधिकसङ्ख्यायां विद्यालये प्रवेष्टुं नियमितरूपेण च विद्यालयं प्रति गन्तुम् आरब्धवन्तः । शिक्षकाः कथयन्ति यत् पूर्वं बालकाः भोजनं कर्तुं गृहं गच्छन्ति स्म तथा च पुनः ते विद्यालयं पठितुं न आगच्छन्ति स्म । परन्तु अधुना तैः तथा न करणीयं भवति । अनेन कार्यक्रमेण जातिगत-पूर्वाग्रहान् न्यूनीकर्तुम् अपि साहाय्यं प्राप्तम् । यतोहि विद्यालये उच्चवर्गस्य निम्नजातिवर्गस्य च बालकाः मिलित्वा एव भोजनं कुर्वन्ति तथा च केषुचित् स्थानेषु तु भोजनं पक्तुं दलित-महिलानां नियुक्तिः कृता वर्तते । मध्याह्न-भोजन-कार्यक्रमेण निर्धन-विद्यार्थिनां बुभुक्षां शमयितुम् अपि साहाय्यं कृतं ये प्रायः रिक्तोदरेण एव विद्यालयं प्रति आगच्छन्ति तथा च एतस्मात् कारणात् अध्ययने अवधानं केन्द्रितं न कर्तुं पारयन्ति ।

यद्यपि प्रशासकीयकार्यक्रमाः अवसराणां समानतायाः वर्धने महत्त्वपूर्णां भूमिकां निर्वहन्ति किन्तु अधुना अपि बहु किमपि सम्पादनस्य आवश्यकता अस्ति । मध्याह्नभोजनकार्यक्रमेण निर्धनबालकानां विद्यालये प्रवेशसङ्ख्या उपस्थितिसङ्ख्या च वर्धिता परन्तु पुनरपि अस्मिन् देशे ते विद्यालयाः यत्र धनिकानां बालकाः गच्छन्ति, तेभ्यः विद्यालयेभ्यः आधिक्येन पृथक्तां भजन्ते यत्र निर्धनानां बालकाः पठन्ति । अद्य अपि देशे अनेके विद्यालयाः सन्ति येषु ओमप्रकाशवाल्मीकिसदृशैः बालकैः सह भेदभावस्य असमानतायाः च व्यवहारः क्रियते । एते बालकाः एतादृशीषु असमानस्थितिषु क्षिप्यन्ते यत्र तेषां सम्मानस्य रक्षा न भवति । एवम् एतस्मात् कारणात् भवति यतोहि अधिनियमस्य निर्माणान्तरम् अपि जनाः तैः सह समानं व्यवहारं कर्तुं सज्जाः न सन्ति अर्थात् ते तथा कर्तुं न स्वीकुर्वन्ति ।



*उत्तराखण्डस्य शासकीयशालायां तेषां मध्याह्नभोजनं वितरन्ती काचित् महिला दृश्यते।*

*मध्याह्न-भोजन-कार्यक्रमः कः अस्ति ? किं भवन्तः एतस्य कार्यक्रमस्य लाभत्रयं वक्तुं शक्नुवन्ति ? भवतां चिन्तनानुसारेण एषः कार्यक्रमः कथं समानतायाः भावनां वर्धयितुं शक्नोति ?*

*स्वक्षेत्रे क्रियान्वयितायाः कस्याश्चित् सर्वकारीययोजनायाः विषये जानन्तु । एतस्यां योजनायां किं क्रियते ? एषा कस्य लाभार्थं निर्मिता अस्ति ?*



*"स्वात्मसम्मानस्य हानिं कृत्वा जीवनम् अशोभनीयम् अस्ति । आत्मसम्मानं जीवनस्य महत्तमः भागः अस्ति । एतेन विना मनुष्यः नगण्यः अस्ति । आत्मसम्मानेन सह जीवनस्य यापनार्थं मनुष्येण विपत्तिषु जयः प्राप्तव्यः। केवलं कठिनेन निरन्तरसङ्घर्षेण एव मनुष्यः बलं विश्वासं मान्यतां च प्राप्तुं शक्नोति"।*

*मनुष्यः नाशवान् अस्ति । प्रत्येकं जनेन एकस्मिन् दिने तु मर्त्तव्यम् एव अस्ति परन्तु मनुष्येण अयं सङ्कल्पः करणीयः यत् सः स्वजीवनस्य बलिदानम् आत्मसम्मानस्य उच्चादर्शान् विकसयितुं तथा च स्वमानवजीवनस्य उन्नत्यर्थं करिष्यति । कस्यचित् साहसपूर्णस्य मनुष्यस्य कृते आत्मसम्मानरहितात् जीवनात् अधिकम् अशोभनीयम् अन्यत् किमपि नास्ति एव"।*

*-बी-आर.अम्बेडकरः*

एतस्य मुख्यं कारणम् अस्ति यत् दृष्टिकोणे अतीव शनैः शनैः परिवर्तनम् आगच्छति । यद्यपि जनाः जानन्ति यत् भेदभावस्य ब्यवहारः अधिनियमस्य विरुद्धः अस्ति पुनरपि ते जाति-धर्म-पङ्गुता-आर्थिकस्थितीनां महिलायाः आधारेण च जनैः सह असमानतायाः व्यवहारं कुर्वन्ति । वर्तमानदृष्टिकोणस्य परिवर्तनं तदा संभवम् अस्ति यदा जनाः इत्थं विश्वसेयुः यत् कोऽपि हीनः नीचः वा नास्ति सर्वेषां महत्त्वम् अस्ति तथा च प्रत्येकं जनः सम्मानजनकस्य व्यवहारस्य अधिकारी अस्ति । प्रजातन्त्रीयसमाजे समानतायाः स्थापना कश्चित् सातत्येन सङ्घर्षः अस्ति यस्मिन् जनैः समाजैः च सहयोगः प्रदातव्यः । एतस्मिन् पुस्तके भवन्तः एतस्मिन् विषये इतोऽपि विस्तरेण पठिष्यन्ति ।

## *अन्येषु लोकतन्त्रेषु समानतायाः विषयाः*

प्रायः भवन्तः चिन्तयन्तः भवेयुः यत् किं भारतीयलोकतन्त्रे इत्थम् एव अस्ति यत्र असमानतायाः अस्तित्वम् अस्ति तथा च यत्र समानतायाः कृते सङ्घर्षः सातत्येन चलति । सत्यं तु इदम् अस्ति यत् संसारस्य अधिकतमेषु लोकतान्त्रिकदेशेषु समानतायाः विषये विशेषेण सङ्घर्षः जायमानः अस्ति । उदाहरणार्थं संयुक्तराज्ये अमेरिकायाम् अफ्रीकी-अमेरिकन-जनाः येषां पूर्वजाः क्रीतदासाः आसन् तथा च अफ्रीकातः आनीताः आसन् ते अद्यापि स्वजीवनम् असमानरूपेण एव यापयन्ति । यद्यपि **1950** तमस्य अन्तिमे दशके अफ्रीकी-अमेरिकीजनानां कृते समानम् अधिकारं दापयितुम् आन्दोलनम् अभवत् । इतः पूर्वम् अफ्रीकी-अमेरिकीयैः जनैः सह संयुक्तराज्ये अत्यधिक-असमानतायाः व्यवहारः भवति स्म तथा च अधिनियमः अपि तेषां कृते समानतायुक्तं न्यायं न प्रददाति स्म । उदाहरणार्थं बसयानेन यात्रासमये तैः पृष्ठतने भागे उपवेष्टव्यं भवति अथवा कश्चित् श्वेतजनः उपवेष्टुम् इच्छति चेत् तैः स्व-आसनतः उत्थातव्यं भवति स्म ।



रोजापार्क्स एका अफ्रीकी-अमेरिकनमहिला यस्याः विद्रोहिप्रतिक्रियया अमेरिकीयस्य इतिहासस्य दिशा परिवर्तिता।

रोजापार्क्सः इति काचित् अफ्रीकी-अमेरिकादेशीया महिला आसीत् । दिसम्बरमासस्य प्रथमदिनाङ्कस्य 1955 तमे वर्षे सा आदिनं कार्यं कृत्वा श्रान्ता आसीत् तया बसयाने स्वस्य आसनं कस्मैचित् श्वेतजनाय दातुम् अनङ्गीकृतम् । तस्मिन् दिने तस्याः अस्वीकरणात् अफ्रीकामूलस्य अमेरिकाजनैः सह असमानतां विषयीकृत्य विशालस्य आन्दोलनस्य प्रारम्भः जातः यः नागरिक-अधिकार-आन्दोलनरूपेण विख्यातम् (सिविल-राइट्स-मूवमेन्ट) इति । 1964 तमस्य नागराधिनियमः जाति-धर्म-राष्ट्रिय-मूलाधिकाराणाम् आधारेण भेदभावस्य निषेधं कृतवान् । एषः एतद् अपि उक्तवान् यत् अफ्रीकीमूल-अमेरिकायाः बालकानां कृते सर्वेषां विद्यालयानां द्वाराणि उद्घाटयिष्यन्ते तथा च तैः भिन्नेषु भिन्नेषु विद्यालयेषु शिक्षार्थं न गन्तव्यं भविष्यति ये विशेषरूपेण तेषां कृते एव उद्घाटिताः आसन् । इत्थं भूते सति अपि आधिक्येन अफ्रीकामूलीयाः अमेरिका-वास्तव्याः निर्धनाः सन्ति । अधिकतराः अफ्रीकीमूलीयाः अमेरिकीयाः बालकाः केवलम् एतादृशेषु सर्वकारीयेषु विद्यालयेषु एव प्रवेष्टुं सामर्थ्यवन्तः सन्ति यत्र न्यूनानि सौविध्यानि सन्ति तथा च न्यूनयोग्यतावन्तः शिक्षकाः सन्ति  अपरञ्च श्वेताः विद्यार्थिनः निजविद्यालयान् एव गच्छन्ति अथवा तेषु क्षेत्रेषु निवसन्ति यत्रत्यानां सर्वकारीयविद्यालयानां स्तरः निजविद्यालयैः सदृशः एव उन्नतः अस्ति ।

*भारतस्य संविधानस्य पञ्चदशस्य अनुच्छेदस्य केचन अंशाः*

*धर्म-मूलवंश-जाति-लिङ्ग-जन्मस्थानानाम् आधारेण विभेदस्य प्रतिषेधः*

*(1) राज्यं कस्यापि नागरस्य विरुद्धं केवलं धर्म-मूलवंश-जाति-लिङ्ग-जन्मस्थानानाम् अथवा एतेषु कस्यापि आधारेण कमपि विभेदं न करिष्यति।*

*(2) कश्चित् नागरः केवलं धर्म-मूलवंश-जाति-लिङ्ग-जन्मस्थानानाम् अथवा एतेषु कस्यापि आधारेण -*

*क) आपणानां सार्वजनिकभोजनालयानाम् उपाहारगृहाणां सार्वजनिकमनोरञ्जनस्य च स्थानानां प्रवेशसम्बन्धे कस्यापि निर्योग्यतायाः दायित्वस्य निर्बन्धस्य अथवा प्रतिभूत्याः अधीनः न भविष्यति ।*

*अथवा*

*ख) पूर्णतः अथवा भागतः राज्यनिधेः पोषितः अथवा साधारणजनतायाः प्रयोगार्थं समर्पितकूपानां तडागानां स्नानघट्टानां राजमार्गाणां तथा च सार्वजनिकसमागमस्य स्थानानाम् उपयोगस्य सम्बन्धे कस्यापि नियोग्यतायाः दायित्वस्य निर्बन्धस्य अथवा प्रतिभूत्याः अधीनः न भविष्यति।*

## लोकतन्त्रस्य आवाहनम्

कोऽपि देशः पूर्णरूपेण लोकतान्त्रिकः अस्ति इति न वक्तुं शक्यते। सदा एव एतादृशाः समुदायाः जनाः च भवन्ति ये लोकतन्त्रस्य पृथक् परिभाषां कुर्वन्ति अपि च अधिकाधिकां समानताम् आनेतुं नूतनान् नूतनान् प्रश्नान् कुर्वन्ति। एतस्य केन्द्रे सः सङ्घर्षः अस्ति यः सर्वेषां जनानां कृते समानता-दानस्य सम्मान-दानस्य च पक्षधरः अस्ति । एतस्मिन् पुस्तके भवन्तः पठिष्यन्ति यत् कथं समानतायाः प्रश्नः भारतीय-लोकतन्त्रे अस्माकं दैनन्दिन-जीवनस्य विभिन्नान् पक्षान् प्रभावयति। एतेषां पाठानां पाठनकाले विचारं कुर्वन्तु यत् किं सर्वेषां जनानां समानतां तेषाम् आत्मसम्मानं च शिखरे स्थापनस्य भावनां जनाः स्वीकुर्वन्तः सन्ति उत न।

# अभ्यासः

1 लोकतन्त्रे सार्वभौमिक-वयस्क-मताधिकारः किमर्थं महत्त्वपूर्णः अस्ति?

2 मञ्जूषायां प्रदत्तस्य संविधानस्य पञ्चदशम् अनुच्छेदं पुनः पठन्तु तथा च एतादृशम् उपायद्वयं ज्ञापयतु यतः अयम् अनुच्छेदः असमानतां दूरीकरोति ?

3 ओमप्रकाशवाल्मीकेः अनुभवः अंसारीदम्पत्याः अनुभवेन केन प्रकारेण समानः आसीत् ?

4 "अधिनियमस्य दृष्ट्या सर्वे जनाः समानाः सन्ति" एतेन कथनेन भवन्तः किम् अवगच्छन्ति ? भवतां विचारेण अयं लोकतन्त्रे किमर्थं महत्वपूर्णः अस्ति ?

5 भारतसर्वकारेण 1995 तमे वर्षे विकलाङ्गता-अधिनियमः स्वीकृतः आसीत् । एतस्य अधिनियमस्य अनुसारं विकलाङ्गजनानां कृते अपि समानाः अधिकाराः प्राप्ताः सन्ति तथा च समाजे तेषां सम्पूर्णरूपेण सहभागितायाः प्रबन्धः सर्वकारस्य दायित्वम् अस्ति । सर्वकारेण तेभ्यः निःशुल्कत्वेन शिक्षा दातव्या अपि च विकलाङ्गबालकाः विद्यालयस्य मुख्यधारायां सम्मेलनीयाः । अधिनियमः एतद् अपि वदति यत् सर्वेषु सार्वजनिकस्थलेषु भवनेषु विद्यालयादिषु समतलमार्गाः निर्मातव्याः यतः तत्र विकलाङ्गानाम् आवागमनं सरलतया भवेत् ।

चित्रं पश्यतु तस्य च बालकस्य विषये चिन्तयन्तु यः सोपानेभ्यः अधः आनीयते । किं भवन्तः अनुभवन्ति यत् एतस्यां परिस्थितौ विकलाङ्गतायाः अधिनियमः क्रियान्वयितः स्यात् ? सः भवनं प्रति सरलतया आवागमनं कर्तुं शक्नुयात् तस्य कृते किम् आवश्यकम् ? तम् उत्थाप्य सोपानेभ्यः अवतारणं तस्य सम्मानं सुरक्षां च कथं प्रभावयति ?



शब्द-सङ्कलनम्

सार्वभौमिक-वयस्क-मताधिकारः - अयं लोकतान्त्रिकसमाजस्य अत्यन्तं महत्वपूर्णः पक्षः अस्ति । एतस्य अर्थः अस्ति यत् सर्वेभ्यः वयस्केभ्यः नागरेभ्यः मतदानस्य अधिकारः अस्ति । सः सामाजिकपृष्ठभूमितः उत आर्थिकपृष्ठभूमितः वा भवेत् ।

गरिमा – एतस्य तात्पर्यम् आत्मानम् अपरान् जनान् च सम्मानयोग्यान् अवगन्तुम् अस्ति ।

संविधानम् – अयम् एकः अभिलेखः अस्ति यस्मिन् देशस्य जनतया सर्वकारेण च पालनयोग्यानाम् अधिनियमानां नियमानां च निरूपणं कृतम् अस्ति ।

नागरिक-अधिकार-आन्दोलनम् – किञ्चित् आन्दोलनं यत् संयुक्तराज्य-अमेरिकायां 1950 तमस्य दशकस्य अन्ते प्रारब्धम् अपि च यस्मिन् अफ्रीकाभिजन-अमेरिकीयाः जनाः जातिगत-भेदभावं समापयितुं समान-अधिकाराणां च अभ्यर्थनां कृतवन्तः ।